३· चातुर्मास्यव्रतविधिः-
पत्र·३· सम्पूर्ण

1384

11''X5''

अथ चातुर्मास्यव्रतविधिः आषाढशुक्लपक्षैकादश्यामुपोषितः चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः १
वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवम् २ भविष्ये श्रावणे वर्ज्ज
येच्छाकं दधि भाद्रपदे तथा दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत् ३ जंबीरं राजमाषांश्च मूलकं
मूलकम् कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद्बुधः ४ विशेषाद्बदरीं धात्रीं कूष्माण्डं तिन्तिडीं त्यजेत् जीर्णे धा
त्रीफलश्राद्धेकपवित्रतायशोधानम ५ वार्षिकांश्चतुरो मासान्मत्स्यान्वर्जनोद्भवे मत्वैरवद्वा दिशयत्ने वर्ज्जयेत्सक्तिमान्न
रः ६ अन्नजीवर्जयद्भार्यामासमेधपराद्दनम् पटोलं मूलकं वृन्ताकं चतुर्भक्षयेत् ७ इति चातुर्मास्यव्रतविधिः आ
षाढपौर्णमास्यां तु सन्ध्याकाल उपस्थिते संकल्पयेन्मासमेकं श्रावणे ग्रहमे १ स्नानं करिष्ये नियतो व्रतच
र्य्यास्थितास्सती भक्षामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् २ अस्मिन्नेकव्रते चानुसाया कव्यापिनी ग्राह्या
अथाशौचविचारः चतुर्थे दशरात्रं स्यात्षड्रात्रं पुंसि पञ्चमे तथा षष्ठे त्रिरात्रं स्यादहोरात्रं तु सप्तमे १ अष्टमे दिनमेकं तु
नवमे प्रहरद्वयम् दशमे स्नानमशुद्धिः स्यादेतज्ज्ञातिषु सूतकम् २ आदौ दावेव केतव्याप्तपिण्डोदकक्रिया त्रि
वेनुकर्वीणः पुनः आवसमस्तुते ३ एकादशाहे श्रवनत्र सर्वं समापयेत् पित्रोस्तु यावद्दशाहोच दद्यान्निडासिलाञ्ज
लीन् ४ इति निर्णयामृते मृतायेत्वसितपक्षे एकादशी तिथौ प्रेतक्रिया चकर्तव्यास्त्रिरात्रेणैव शुध्यति ५ कृष्णपक्षे
मृतायेत्वद्वादशीत्रयोदशीम् एवाकारेण विरण्डादौ न त्रिरात्रेणैव शुध्यति ६ यस्तनात्वसितपक्षे यस्याकस्यान्तिथौ
तथा तावज्जात्रचदीपं चयावद्दर्शनलङ्घयेत् ७ स्त्रीचदर्शयामुष्याद्दिस्ते पुत्रजन्नरः तावज्जाश्चदीपं चयावद्दर्श
नलंघयेत् ८ वर्षान्तर्गे श्चयामेन मासिकांश्च सपिण्डनम् गात्रदीपविशेषेण दर्शपर्यन्तकारयेत् ९ इतिहेमाद्रि
पितरौ चेत्समेतौ स्यातां दूरस्थापि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् १० आजन्मनस्तु चूडान्तं यादिक
मा विपद्यते सद्यः शौचं विजानीयात्सर्ववर्णेष्वयं विधिः ११ ततो वाग्दानपर्यन्तं यावद्वेकपि वै दिने वाग्दाने तु कृते तत्र
ज्ञेयंचोभयतस्त्र्यहम् १२ पुलस्त्यः मृतके मृतकेचैव न दाबाराद्रुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते १३

सूतके मृतके चैव यत्र जन्म यदा भवेत् कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति १४ सूतके मृतके चैव संध्या
कर्म समाचरेत् मानसोच्चारयेन्मंत्रान्प्राणायामं मृते द्विजः २५ अञ्जलिदानं च कुर्यादिति गोभिलः आदंत
जन्मनां सद्यः आचूडान्नैशिकी स्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् २६ मुहूर्त्तं जीवितो बालः
पंचत्वं यदि गच्छति मातुः शुद्धिर्दशाहेन सद्यः शौचास्तु गोत्रिणः २७ गर्भमध्ये विपत्तिः स्याद्दशाहं
सूतकं भवेत् यदि जातो मृतश्चैव सद्यः शौचास्तु गोत्रिणः २८ एत्रावेन समुत्पन्ने मृते रजसि सू
तके पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः २९ उदिते तु यदा सूर्ये नारीणां दृश्यते रजः जननं वा
विपत्तिर्वा यस्याहस्तस्य सर्वरी २० सद्यो विप्रस्त्वहोरात्रं सद्यः क्षत्रादिनत्रयम् वैश्यस्तु षड्रात्रं स्या
च्छूद्रो नवदिनानि च २१ मनुः मातृष्वसा मातुलयोः श्वश्र्वाः श्वशुरयोर्गुरोः मृते चर्त्विजि या
ज्ये च त्रिरात्रेण विशुध्यति २२ अग्निहोमादिहोमार्थं शुद्धिस्तात्कालिकी स्मृता पंचयज्ञान्न कु
र्वीत ह्यशुद्धः पुनरेव सः २३ संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् न त्यजेत्सूतके वापि त्यजन्न
गच्छेदधो द्विजः २४ इति स्मृतिसारे इति हेमाद्रिकालनिर्णये त्वाशौचनिर्णयः अथान्ते सू
तकान्ते च रजन्ते च पुनस्तथा श्राद्धं कुर्यात्प्रयत्नेन मनुः स्वायंभुवोब्रवीत् मनुः श्राद्धविघ्ने समु
त्पन्ने मृते रजसि सूतके श्राद्धं कुर्यात्प्रयत्नेन पंचमेकादशेहनि २ तीर्थश्राद्धं गयाश्राद्धं श्राद्धं राम:
चापरपाक्षिकम् अब्दमध्ये तु कर्त्तव्यं यदि स्याज्ज्ञातिमान्सुतः ३ इति वृद्धवसिष्ठः गुर्वादित्ये

न १
गुरौ सिंहे न षट्शुक्रे मलिम्लुचे तीर्थयात्रां न कुर्वीत गोगंगाजंकुरैर्विना १ अथैकादशीनिर्णयः
तत्रोच्यते द्विपंचाशद्घटिका च दशमी स्याद्यते यदि छाया न दा तु विज्ञेया न चाविद्धा भवेत्तदा १ त्रिपं
चाशद्घटीपूर्णा ग्रस्तोसावेप्रगीयते चतुःपंचाशत्कोवेधोप्यतिवेधस्ततोधिकः २ महावेधः
षडधिकः तथोक्तः पूर्वसूरिभिः प्रलयः सप्तपंचाशन्महाप्रोक्तस्तथापरः ३ नवाधिकामहाघो
रा संपूर्णा षष्टिराक्षसी छायादिदिनवेधे तु यः कुर्यात्समुपोषणम् ४ स्वतेषनरकं याति याव
दाहूतसंप्लवः इत्यादिभिर्निर्मूलैर्वचनैः प्रतिपादितश्छायादिवेधो न प्रमाणमिति भोजहेमाद्रिल
क्ष्मीधरप्रभृतिभिर्निबन्धृभिः सर्वमाप्योक्षितत्वात् एवंविधात्याज्येति वचनात्त्वेकादशीदिने सूर्यो
दयस्पर्शिन्या दशम्या विद्धतया त्याज्या वेधश्चाद्ध्रस्वकृतरं स्वप्रवेशरूपत्वात् दशमीरात्रिशेषएका
दश्यनुप्रवेशाद्दशम्येवविद्धा न द्वितीयदिनस्थैकादशीति स्कन्दपुराणे प्रतिपन्नमतयः सर्वाउदया
दोदयाद्ध्रुवेः संपूर्णा इति विख्याता हरिवासरवर्द्धिनाइति. उदयादोदयादिति सूर्योदयात्प्रवृत्ता
न्यसूर्योदयं प्राप्तात्यर्थः हरिवासरस्य संपूर्णत्वमन्यादृशं तु गरुडपुराणे प्रोक्तम् उदया ८
त्प्रागयदा विप्रा मुहूर्तद्वयसंयुता संपूर्णैकादशीनाम तत्रैवोपवसेद्गृही पुनः प्रभातसमये घटि
केकायदा भवेत् तत्रोपवासो विहितश्चतुर्थाश्रमवासिनाम् विधवाचापितत्रैव परतो द्वादशीनयौ

अयमर्थः उदयात्पूर्वं भाविघटिकाचतुष्टयमारभ्योदयद्वयं व्याप्य घटिकामात्रं दृश्यमानैकादशी सं
पूर्णेत्युच्यते तत्र च पूर्वा षष्टिघटिकात्मिका गृहस्थैरुपोष्या उत्तरा घटिकामात्रैव द्वादश्यनुगताय
तिभिर्विधवाभिश्चोपोष्येति परं यदि त्रयोदश्यां पारणयोग्या द्वादशी निःसरति अथ चेत्त्रयोदश्यां क
लामात्रापि द्वादशी स्यात्तदा घटिकात्मिकां विहायोत्तरा सर्वैरेवोपोष्येति भावः संपूर्णैकादशी यत्र
प्रभाते पुनरेव सा उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही तथा च नारायणः सर्वज्ञनिबन्धे संपूर्णै
कादशी यत्र प्रभाते पुनरेव सा लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् उपोष्ये द्वे तिथी तत्र विष्णु
प्रीणनतत्परैः उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही भृगुनारदाभ्यामप्युक्तम् संपूर्णैकाद
शी यत्र प्रभाते पुनरेव सा सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि अत्र गृहस्थानां द्वादशीक्षये घ
टिकैकात्मिकैकादश्युपवासो द्वादशीनुपारणानुरोधायेति चेत् तदुत्तरदिने ज्ञासस्याकस्मि
कस्यज्ञोतिः शास्त्रप्रसिद्धत्वम् प्रचेताः पूर्णाप्येकादशी त्याज्या वर्द्धते द्वितयं यदि द्वादश्यां पार
णाभावे पूर्वैव परिगृह्यते इतीदं वचनमेकादशीद्वादश्युभयवृद्धिविषयम् वर्द्धते द्वितयमित्यु
क्तेः यदि षष्टिघटिकैकादशी दिनान्तरे च द्वे घटिकामात्रे च तृतीयेऽह्नि त्रयोदश्यां किंचिदपि द्वा
दशी तदोत्तरोपोष्या वाराहपुराणे एकादशी विष्णुना च द्वादशी परतः स्थिता उपोष्या द्वादशी राम-
तत्र यदीच्छेत्परमं पदम् विष्णुर्द्वादशी सहायेन तोयथा परतस्त्रयोदश्यामेकादशी भवेत्स्पर्णापि २

रतो द्वादशीं यदि एकादशीं परित्यज्य द्वादशीं समुपोषयेत् इति प्राचीनवचनानि च यद्दृष्टं दशम्या
मेकादशीसद्भावे द्रष्टव्यम् अतस्त्रयोदश्यां द्वादशीसद्भावेऽप्येकादशीकलाविरहे सैकादशी
व्रतार्थः केवलद्वादश्युपवासः सर्वेषां निरस्तः यानि चैकादशीकलारहितशुद्धद्वादश्युपवा
सप्रतिपादकानि वचनानि तानि काम्यद्वादश्युपवासविषयाणि न नित्यैकादश्युपवासा
पानीति अथ विद्धानिर्णयः व्यासः यातिथिः स्पृशते राजन् प्रातरर्कावलोकिनी स
वेध इति विज्ञेयो योगः सूर्योदये मतः नारदीये अरुणोदयवेलायां दशमी तिष्ठते यदि
तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् नारदः दशम्यनुगता यत्र तिथिरेकादशी
भवेत् तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत् विष्णुरहस्ये दशमीशेषसंयुक्तामु
पोष्यैकादशीं किल संवत्सरकृतेनेह नरो धर्मेण मुच्यते दशमीशेषसंयुक्ता गान्धा
र्या समुपोषिता तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् ब्रह्मवैवर्ते ये कृता दशमी
विद्धा विघ्नमोहितमानवैः ते गता नरकं घोरं युगान्येकोनविंशतिमित्यादीनां वाक्यानां
लोकप्रसिद्धानां त्रयोदश्यां द्वादशीसद्भावे विषयोऽत्र द्रष्टव्यः कलाकाष्ठापि द्वादशी य
दि स्यात्परेऽहनि द्वादश्यां द्वादशी हन्ति पूर्वविद्धा उपोषिता इति प्रचेतःस्मरणात् तथा च

नानामुनिवचननिश्चयः एकादशी यदा न स्याद्द्वादशी न क्षयं गता दशम्येकादशी कार्या वेधदोषो न विद्यते भ
विष्यपुराणे एकादशी दशाविद्धा परतो न भवेद्यदि तदानीं दशमीविद्धा उपोष्यैकादशी तिथिः नारदः
यदा कोट्यधमा प्राप्ति दशमीनापरेऽहनि एकादशी तदा कार्या दशमीशिवसंयुता निगमरहस्ये दशमीशेष
संयुक्ता ह्युपोष्यैकादशी तदा त्रयोदश्यां यदा न स्यान्न्यूनत्वे द्वादशी तिथिः देवलः महाहानिप्रकर्त्री या या तिथिः
क्षयगामिनी दशम्येकादशी यत्र तत्रोपोष्य व्रतं चरेत् तथा विद्धाप्येकादशी कार्या परतो द्वादशी न चेत् कौर्मे मुहू
र्त्ते द्वादशी न स्यात्त्रयोदश्यां यदा तु वै उपोष्या दशमीमिश्रा अपि चोद्दालकोऽब्रवीत् हारीतः त्रयोदश्यां यदा न
स्याद्द्वादशी घटिकाद्वयम् उपोष्या दशमीविद्धा महापुण्यप्रदायिनी स्मृत्यन्तरे ह्नीयेऽहनि सम्प्राप्ते द्वाद
शी न भवेद्यदि दशम्या सहिता तत्र एकादश्य व सर्वदा दशम्यान्वितापि कर्त्तव्या यदि दानं दृश्यते द्वादशी द्वा
दशीं हित्वा त्रयोदश्यां तु पारणम् तथा विद्धाप्येकादशी कार्या द्वादशी चेन्न लभ्यते द्वादश्यां द्वादशीं हित्वा त्रि
यादश्यां तु पारणम् कालादर्शे एकादशी यत्र विद्धान्ते तीये द्वादशी क्षयः मुहूर्त्ते पंचदशमीविद्धाम
पि समाचरेत् स्थलमतिप्रसंगेन इति दिवोदासप्रकाशे एकादशीनिर्णयः ॥

रामः
३